**द्वितीयः पाठः**

# वृक्षाणां चेतनत्वम्

## (वृक्षों की चेतनता)

*[यह पाठ महाभारत से लिया गया है। इस पाठ में दर्शाया गया है कि "वृक्षों में भी इतर प्राणियों के समान चेतनता है, वे भी सुख-दु:ख का अनुभव करते हैं, अत: उनके साथ भी मनुष्यों को सद्व्यवहार करना चाहिए।" इसमें महर्षि भरद्वाज प्रश्नकर्त्ता और महर्षि भृगु समाधानकर्त्ता हैं।]*

**भृगुरुवाच—**

**अमितानां महाशब्दो यान्ति भूतानि सम्भवम्।**
**ततस्तेषां महाभूतशब्दोऽयमुपपद्यते।।1।।**
**चेष्टा वायुः खमाकाशमूष्माग्निः सलिलं द्रवः।**
**पृथिवी चात्र संघातः शरीरं पाञ्चभौतिकम्।।2।।**
**इत्येतैः पञ्चभिर्भूतैर्युक्तं स्थावर-जङ्गमम्।**
**श्रोतं घ्राणं रसः स्पर्शो दृष्टिश्चेन्द्रियसंज्ञिता।।3।।**

**भरद्वाज उवाच—**

**पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः।**
**स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः।।4।।**
**अनूष्माणामचेष्टानां घनानां चैव तत्त्वतः।**
**वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः।।5।।**
**न श्रृण्वन्ति न पश्यन्ति न गन्धरससेविनः।**
**न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः।।6।।**
**अद्रवत्वादनग्नित्वादभूमित्वादवायुतः।**
**आकाशस्याप्रमेयत्वाद् वृक्षाणां नास्ति भौतिकम्।।7।।**

**भृगुरुवाच—**

**घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः।**
**तेषां पुष्पफलव्यक्तिर्नित्यं समुपपाद्यते।।8।।**
**ऊष्मतो म्लायते पर्णं त्वक् फलं पुष्पमेव च।**
**म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते।।9।।**
**वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्यते।**
**श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः।।10।।**
**वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति।**
**न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः।।11।।**
**पुण्यापुण्यैस्तथा गंधैर्धूपैश्च विविधैरपि।**
**अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः।।12।।**
**पादैः सलिलपानाच्च व्याधीनां चापि दर्शनात्।**
**व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे।।13।।**
**वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत्।**

**तथा पवनसंयुक्तः पादैः पिबति पादपः।।14।।**
**सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात् ।**
**जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते।।15।।**
**तेन तज्जलमादत्तं जरयत्यग्नि-मारुतौ।**
**आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते।।16।।**
**एतेषां सर्ववृक्षाणां छेदनं नैव कारयेत्।**
**चतुर्मासे विशेषेण विना यज्ञादिकारणम्।।17।।**
**एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।**
**वासितं वै वनं सर्वं सुपुत्रेण कुलं यथा।।18।।**

## अभ्यास प्रश्न

1. निम्नलिखित श्लोकों की ससन्दर्भ हिन्दी में व्याख्या कीजिए-
   (क) चेष्टा वायुः ..................................... पाञ्चभौतिकम्।
   (ख) न शृण्वन्ति ..................................... पाञ्चभौतिकाः।
   (ग) पादैः ..................................... द्रुमे।
   (घ) एकेनापि ..................................... कुलं यथा। **(2020MS)**
   (ङ) पञ्चभिर्यदि ..................................... पञ्च धातवः।
   (च) वल्ली वेष्टयते ..................................... पश्यन्ति पादपाः।
   (छ) अनूष्माणामचेष्टानां ..................................... पञ्च धातवः।
   (ज) एतेषां सर्व वृक्षाणी ..................................... यज्ञागिदकारणम्। **(2020MQ)**
2. निम्नलिखित सूक्तियों की सन्दर्भ सहित हिन्दी में व्याख्या कीजिए-
   (क) शरीरं पाञ्चभौतिकम्। **(2019AR, 20MS)**
   (ख) पादैः पिबति पादपः। **(2018HT, 20MO, MR, MT)**
   (ग) वासितं वै वनम् सर्वं सुपुत्रेण कुलं यथा। **(2019AU)**
   (घ) एतेषां सर्ववृक्षाणां छेदनं नैव कारयेत्। **(2019AO, 20MP)**
   (ङ) अमितानां महाशब्दो यान्ति भूतानि सम्भवम्।
   (च) एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
3. निम्नलिखित श्लोकों का संस्कृत में अर्थ लिखिए-
   (क) अनूष्माणाम् .....................................धातवः।
   (ख) घनानामपि .....................................समुपपाद्यते।
   (ग) सुखदुःखयोश्च .....................................विद्यते।
   (घ) एकेनापि .....................................कुलं यथा। **(2019AT, 20MO)**
   (ङ) ऊष्मतो .....................................नात्र विद्यते।
   (च) एतेषां सर्ववृक्षाणां .....................................यज्ञादिकारणम् **(2020MR)**
   (छ) चेष्टा वायुः .....................................पाञ्चभौतिकम्।

## ➡ आन्तरिक मूल्यांकन

कितने प्रकार के वृक्षों को आप जानते हैं? एक सूची बनाइए।